CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library

S.D.P.B.

Coll. No. 815

Title Tryambakī Āśauca nirṇaya

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 815 Subject: Dharmaśāstra

Title: Tryambakī Āśaucanirṇaya.

Author: Raghunātha Paṇḍita. Scribe: Śivadeva.

Date of the work: – Date of the Ms.: V.S. 3500

Place of the work: – Place of the Ms.: –

Size: 8.7" by 3.8" Extent: 13 foll.

Language: Sanskrit. Script: Devanāgarī

Remarks:

॥त्र्यंबकी आशौचनिर्णयः॥

॥श्रीगणेशायनमः॥ ॥गणाधिपंनमस्कृत्यश्रत्युडाद्विपविंकविं।त्र्यंबकेणा
शुबोधायक्रियतेशौचनिर्णयः॥१॥अर्थतःशब्दतश्चैरूपोनरुत्यंनदुष्यति।स्फु
टबोधायबालानांग्रंथोयंरच्यतेयतः॥२॥अथप्रागुपनयनात्कामचारका
मवादभक्षाइतिगौतमोक्तेरनुपनीतस्योपवीतादिसंस्कारंविनाशौचेनाधि
कारः॥उपनयनोत्तरमपिब्रह्मचारिणःपित्राद्यंत्यकर्मकरणएवाशौचाधि
कारोनान्यत्र॥तस्माद्द्विजानांसमावर्त्तनोत्तरंनिरंकुशोशौचाधिकारः
स्त्रीशूद्रयोस्तुविवाहस्यउपनयनस्थानापन्नत्वेनविवाहोत्तरमेवाशौचाधि
कारः॥ ॥इतिश्रीत्र्यंबकीयेअशौचनिर्णयेप्रथमोंऽशः॥१॥अथजन

शौचं॥तत्रगर्भिण्यामासचतुष्टयपर्यंतंगर्भनाशःस्रावइत्युच्यते।तदागर्भि
ण्यामासत्रयपर्यंतंत्रिरात्रंचतुर्थमासेचतूरात्रमाशौचंमस्पृश्यत्वंच॥
पित्रादिसपिंडानांस्रावमात्रेस्नानाच्छुद्धिः॥ ॥इतिद्वितीयोंशः॥२॥गर्भि
ण्याःपंचमषष्ठमासयोर्गर्भनाशःपातउच्यते॥तत्रगर्भिण्यामाससमसंख्य
यापंचषड्दिनानिक्रमेणास्पृश्यत्वावद्गमाशौचं॥पित्रादिसपिंडानांतुत्रिरा
त्रंजननाशौचं॥मृताशौचंनास्ति॥इदमेतावत्पर्यंतंसर्ववर्णसाधारणंवृद्धी
वस्थानिमित्तत्वात्॥ ॥इतितृतीयः॥गर्भिण्याःसप्तममासप्रभृतिप्रसवे
सर्वेषांमातापित्रादीनांसपिंडानांविप्राणांदशाहंक्षत्रियाणांद्वादशाहं।

शौ॰
त्र्यं॰
र्भि
१

चतुर्थांशः॥ नवति॥

वैश्यानांपंचदशाहं॥शूद्राणांमासं॥सच्छूद्राणांमासार्द्धंजननाशौचं॥मृ
ताशौचंतुनास्ति॥सापत्नमातुः सर्वत्रपितृवदिति॥४॥जननाशौचेगर्भनिर्गमा
दशाहमस्पृश्यत्वं॥पितुःसापत्नमातुश्चस्नानात्प्राकस्पृश्यत्वं॥स्नानो
त्तरंस्पृश्यत्वमेव॥किंतुसर्वसपिंडानांकर्मानधिकारमात्रं॥तत्रनालच्छे
दनात्पूर्वंजातकर्मदानादौपितुरधिकारः॥एवंप्रथमषष्ठदशमदिवसे
जन्मदाख्यादेवतापूजायांचपितुर्वचनादधिकारः॥कूटस्थमारभ्य
सप्तपुरुषपर्यंतंसपिंडाः॥ततःसप्तसमानोदकाः॥ततःसप्तसगोत्राः
समानोदकानांत्रिरात्रमाशौचं॥सगोत्राणांस्नानमात्रं॥इतिपंचमः॥

शौ
ति॰

॥गर्भनिर्गमादशाहोत्तरंपुत्रोत्पत्तौविंशतिदिनानिकन्योत्पत्तौमासपर्यंतंकर्मा
नधिकारइति॥६॥अथमृताशौचं॥तत्रतद्वतामस्पृश्यत्वंकर्मानधिकारश्चे
त्युभयंभवति॥अत्रजातमृतेमृतजातेवाशिशौसर्वेषांसपिंडानांदशाहंज
ननाशौचं॥मृताशौचंतुनास्ति॥७॥नालच्छेदनात्पूर्वंशिशौमृतेमातुर्दशाहं॥
पित्रादीनांसपिंडानांत्रिरात्रंजननाशौचं॥मृताशौचंतुनास्ति॥८॥नालच्छेदना
दूर्ध्वंशिशुमरणेदशाहंजननाशौचंसर्वेषांसपिंडानांअस्ति॥मृताशौचंना
स्ति॥९॥दशाहानंतरंनामकरणात्प्राक्शिशुमरणेस्नानमात्रेणसपिंडानां
शुद्धिः॥मातापित्रोस्त्रिरात्रंपुत्रमृतौ॥कन्यामृतौत्वेकाहः॥नाम्नःपूर्वंखन त्रिरात्रंच
शौतिः १

यथासपिंडानामादंतजननात्सद्यस्तेनेनदंतात्प्राक्तद्यःशुद्धिः॥तथासमानोदकानांमौंजीबंधनात्सर्वेसद्यइति॥
त्रिरात्रमितिषडशीतिः॥५॥ मौंजीबंधनात्प्रर्वमतेन॥इतिनिर्णयप्रदीपे॥

नमेवनित्यं॥नोदकादि॥अर्वाकरणादिषुसर्वत्रभवति॥१०॥नामकरणोत्त
रंवर्षद्वयपर्यंतंदहनखननयोर्विकल्पः॥११॥नामोत्तरंदंतोत्पत्तेःप्राक्पुत्र
मरणेदाहेसपिंडानामेकाहः॥खननेतुस्नानाच्छुद्धिः॥मातापित्रोरुन्नय
त्रापित्रिरात्रं॥कन्यायास्तुत्रिपुरुषसपिंडानामुन्नयत्रापिस्नानाच्छुद्धिः॥
मातापित्रोरुन्नयत्राप्येकाहः॥दंतोत्पत्तेरूर्ध्ववर्षत्रयपर्यंतंपुत्रमरणेदाहे
खननेवासपिंडानामेकाहः॥मातापित्रोस्त्रिरात्रं॥कन्यामृतौत्रिपुरुषसपिं
डानांस्नानाच्छुद्धिः॥मातापित्रोस्त्रिदिनमाशौचं॥१२॥प्रथमवर्षादौकृतचू
डस्यपुत्रस्यमरणेपित्रादिसर्वसपिंडानांत्रिदिनमाशौचंनियतंदाहस्तुनियतः
खननएकाहःदाहेत्रिरात्रेतिमाधवः॥१३

सि
॥त्रिवर्षोर्ध्वंकृतचूडस्याकृतचूडस्यवापुत्रस्यमरणेप्रागुपनयनात्पित्रादि
सर्वसपिंडानांत्रिदिनमाशौचं॥दाहएव॥उदकदानादितूष्णीं॥कृतचूडस्य
भूमौपिंडदानंतूष्णीं॥१५॥कन्यायाःवर्षत्रयानंतरंवाग्दानात्प्राक्मरणे
त्रिपुरुषसपिंडानामेकाहः॥मातापित्रोस्त्रिदिनं॥दाहोदकदानादितूष्णीमे
व॥१६॥वाग्दानोत्तरंविवाहात्प्राक्मृतासुकन्यासुभर्तृकुलेपितृकुलेचस
त्रिपुरुषसपिंडानांपित्रादीनांसर्वेषांत्रिरात्रमाशौचं॥दाहोदकदानादितूष्णीं
॥१७॥उपनयनोत्तरंमृतस्यपुरुषस्यसपिंडानांविप्राणांदशाहः॥क्षत्रिया
णांद्वादशाहंवैश्यानांपंचदशाहं॥शूद्राणांमासः॥सच्छूद्राणांमासार्द्धं॥सोद

यत्र शुद्धिः सपिंडानां त्रिरात्रान्मृत्विज्मनोः। समानोदकजावानामहोरात्रेणसान्नवेत्॥ इति स्मृत्यंतरे॥

कानांत्रिरात्रं॥ गोत्रजानांस्नानाच्छुद्धिः॥१८॥ विवाहोर्ध्वंकन्यायाःपितृगृहेमरणे
मातापित्रोः सोदरभ्रातुश्चत्रिरात्रं। पितृव्यादीनामेकाहः॥१९॥ ऊढायाः कन्या
एकाहः मतांतरे याः पितृगृहे प्रसवे मातापित्रोस्त्रिरात्रं। सोदरस्य एकरात्रं॥ पितृव्यादीनामेका
हइतिकेचित्॥२०॥ ऊढायाः कन्यायाः पतिगृहे प्रसवे पित्रादीनामाशौचं नास्ति॥
२१॥ ऊढकन्यायाः पतिगृहे मरणे मातापित्रोस्त्रिरात्रं॥२२॥ मातापित्रोर्मर
णे ऊढपुत्र्यास्त्रिरात्रं दशाहांतः। दशाहोर्ध्वं कालांतरे वत्सरांतेपिपक्षिणी॥
अत्रैवातिक्रांताशौचं ब्राह्मपुराणवचनाद्भवति नान्यत्र॥२३॥ भ्रातृभगि
न्योः परस्परगृहे मरणे परस्परस्य त्रिरात्रं॥ गृहांतरमृतौ तु परस्परस्य प

अन्यगेहे मरणे पक्षिणी इ
ति स्मृत्यर्थसारो॥

गृहांतरे पक्षिणी

क्षिणी॥२४॥ मातुलमरणे भगिन्यपत्यस्य पक्षिणी। उपकारकमातुलमरणे
तु त्रिरात्रं॥२५॥ मातुलान्यामरणे भर्तृभगिन्यपत्यस्य पक्षिणी॥२६॥ उपनी
तभागिनेयमरणे मातुलस्य मातुलभगिन्याश्च त्रिरात्रं॥ अनुपनीते मृते तु
मातुलस्य मातुलभगिन्याश्च पक्षिणी॥२७॥ मातामहमरणे दुहित्रपत्य
स्य त्रिरात्रं॥२८॥ दौहित्रे मरणे मातामहस्य मातामह्याश्च त्रिरात्रं॥ अनु
पनीते मृते तु मातामहस्य मातामह्याश्च पक्षिणी॥२९॥ मातामह्यां मृतायां
दुहित्रपत्यस्य पक्षिणी॥३०॥ श्वश्रूश्वशुरयोर्मृतौ सत्यां जामातुः संनिधौ
त्रिरात्रं॥ असंनिधौ पक्षिणी॥ ग्रामांतरे च एकरात्रं॥३१॥ जामातरि मृते तु

श्वश्रूश्वशुरयोः स्नानाबुद्धिः॥ एकाहमाशौचमितिकेचित्॥३२॥शालके
मृतेतुभगिनीभर्तुरेकाहः॥बालकसुतमरणेतुस्नानमात्रं॥३३॥पितृष्व
सरिमृतायांतुभ्रात्रपत्यस्यपक्षिणी॥३४॥मातृष्वसरिमृतास्वेयांस्त्रपत्यस्य
पक्षिणी॥३५॥आत्मनः पितृष्वसृमातृष्वसृमातुलपुत्राः आत्मबांधवाः॥
पितुः पितृष्वसृमातृष्वसृमातुलपुत्राः पितृबांधवाः॥मातुः पितृष्वसृमातृ
ष्वसृमातुलपुत्राः मातृबांधवाः॥एतेत्रिविधाबांधवाबंधुत्रयं॥एतेषुमृतेषु
पक्षिणी॥पितृष्वस्रादिकन्यानामूढानांतुमरणेएकाहः॥३६॥दत्तकमृतोद्य
वपिरपित्रोस्त्रिरात्रं॥सपिंडानामेकाहः॥३७॥पूर्वापरपित्रोर्मृतौदत्तकस्य

त्रिरात्रं॥३८॥दत्तकस्यपुत्रपौत्राणांमरणेजननेवासपिंडानामेकाहः॥३९
॥सपिंडेपुत्रीकृतेदत्तकेतुमृतेसपिंडानांदशाहएव॥४०॥आचार्यमरणेशि
ष्यस्यत्रिरात्रं॥तत्पुत्रपत्न्योर्मरणेएकाहः॥उपनीयाध्यापकआचार्यइ
त्युच्यते॥वेदैकदेशाध्यापकउपाध्यायः॥तन्मरणेशिष्यस्यैकरात्रं॥४१॥
शिष्यस्यस्वोपनीतस्यमरणेगुरोस्त्रिरात्रं॥परोपनीतमरणेएकरात्रं॥४२॥
सहाध्यायिमृतौएकग्रामीणयोरनूचानश्रोत्रिययोर्मृतौचैकाहः॥सांग
वेदाध्यायीअनूचानः॥वेदमात्राध्यायीश्रोत्रियः॥अध्ययनशास्त्रस्यार्थज्ञा
नपर्यवसायित्वंन्यायसिद्धं॥४३॥असपिंडस्यापिश्रोत्रियस्यमैत्र्यादिसंबं

मरणनिमित्तत्रिरात्रादि

धस्ययगृहेमरणंतद्गृहस्वामिन एकरात्रं॥४४॥वानप्रस्थेयतौ षंढे च युद्ध

मृते च सपिंडानांस्नानमात्रं॥४५॥ ॥अथातिक्रांताशौचं॥ ॥तत्र जनने सपिंडानाम

तिक्रांताशौचंनास्ति॥पितुःस्नानंतत्रापि नवति॥मृतकेपि अनुपनीतम

रणादिनिमित्तकत्रिरात्रादिषु भगिनीमातुलादिषु च अतिक्रांताशौचंनास्ति॥

सा। ॥किंतु दशाहादिमृताशौचविषयमेव॥४६॥दशाहमध्येजनने मरणेवाज्ञाते

पुत्रादीनांसर्वेषांशेषेणैव शुद्धिः॥संस्कारमपिशेषेणैव समापयेत्॥अस्थि

पर्णशरसंस्कारमपिशेषेणैव समापयेत्॥४७॥आद्यत्रिरात्रमध्ये समानो

दकमरणेज्ञाते समानोदकानांशेषेणैव शुद्धिः॥त्रिरात्रेतिक्रांतेतु दशाहम

६

त्रिरात्राद्यतिक्रांतेदशाहमध्येज्ञाते अहमितिषडशीतिः॥ अहन्नाम चतुःप्रहरपर्यंतं॥माधवमते त्रिरात्रातिक्रांताशौ नास्ति॥

ध्येज्ञातेपि नाशौचंकिंतु स्नानमात्रं॥ अयमेवन्यायोमातुलादित्रिरात्रादिषु

ज्ञेयः॥४८॥मातापित्रोर्मरणेदूरदेशेपिवत्सरानंतरमपिश्रवणे पुत्रोदशा

हादिपूर्णमेवाशौचंकुर्यात्॥४९॥स्त्रीपुंसयोःपरस्परमरणेपरस्परस्य

देशांतरेपिवत्सरांतरेपिपूर्णदशाहादि नवति॥५०॥सपत्नीषुपरस्परमृते

परस्परस्यदेशकालानपेक्षंदशाहादिपूर्णमाशौचंनवति॥५१॥सपत्नमातु

र्मरणेसंवत्सरोर्ध्वमपिविदेशेपित्रिरात्रं॥५२॥औरसपुत्रेमृतेसंवत्सरोर्ध्व

मपिदेशांतरेपिमातापित्रोस्त्रिरात्रमितिकेचिदाहुः॥षडशीतिमतेप्येवं॥५३

दशाहोर्ध्वमेकदेशेज्ञानिमरणेज्ञाते मासत्रयपर्यंतंत्रिरात्रं॥षण्मासपर्यंतंप

स्मृत्यर्थसा रेतु असवर्णपत्नीविषयमेतत्॥समानवर्णसपत्नीषुदशाहादिनंतरंकालांतरे वत्सरांतरेपिदशाहमाशौचंनवति॥देशांतरे वत्सरांते॥इतिस्मृत्यर्थसारे

२

देशांतरे तु स्नानमात्रं देशांतरलक्षणं। महानद्यंतरं यत्र गिरिर्वा व्यवधायकः। वाचो यत्र विभिद्यंते तद्देशांतरमुच्यते॥१॥ अत्र किंयत्सरिमाणं देशांतरं तत्र स्मृत्यर्थसारे उक्तं। चतुर्योजनं देशांतरं न्यूनं॥ अष्टयोजनाव

ह्निणी। नवमासपर्यंतं एकदिनं। तदनंतरं स्नानमिति वृद्धवसिष्ठः॥ पक्षत्र-
यपर्यंतं त्रिरात्रं। षण्मासपर्यंतं पक्षिणी॥ वर्षपर्यंतमेकरात्रं॥ तदूर्ध्वं स्नानमि-
ति माधवीये देवलः॥ अत्रापदनापद्विषयत्वेन व्यवस्था॥ पन्ना॥ दशाहोर्ध्वं दे-
शांतरे ज्ञातिमरणे ज्ञाते पक्षपर्यंतं त्रिरात्रं॥ ततो मासषट्कपर्यंतं अहोरात्रं॥ त-
तो वर्षपर्यंतं दिवाश्रवणे आसायं॥ रात्रिश्रवणे आप्रातः शौचं॥ वत्सरांते
स्नानाच्छुद्धिः॥ इदमतिक्रांताशौचं सर्ववर्णसाधारणं। अत्र देशांतरे ज्ञातिम-
रणे ज्ञाते स्नानाच्छुद्धिरिति केचित्। तन्माधवोदाहृतविष्णुस्मृत्यज्ञानविल-
सितमिति ज्ञेयं॥ इति०॥ ५५॥ देशांतरं तु विप्रस्य विंशतियोजनात्परं॥ द्वा-
पंचगिरौ द्वादशयोजनात्परं वा चिरिरिति। माधवमते तु। एकदेशे पक्षत्रयपर्यंतं त्रिरात्रं। तदनंतरं षण्मासपर्यं-
तं पक्षिणी। नवमासपर्यंतमेकाहः। तदनंतरं स्नानमात्रं। इति ज्ञातिविषये स्मृत्यर्थसारे तु। विंशतियोजनदे-

विंशतियोजनात्परं क्षत्रियस्य॥ चतुर्विंशतियोजनात्परं वैश्यस्य॥ शूद्र-
स्य च त्रिंशद्योजनात्परं॥ असच्छूद्रस्य षष्टियोजनात्परं ज्ञेयं। पक्षांतरा-
णि उक्तपक्षानुसारेण नेतव्यानि॥ इति॥ ५६॥ अत्रायं निष्कर्षः॥ यानि
एकगोत्रविषयकजननमरणनिमित्ताशौचानि तानि जायापतिभ्याम-
न्याभ्यामविशेषेणानुष्ठेयानि॥ यानि पुनर्भगिनीमातुलादिभिन्नगोत्रा-
शौचानि तेषु जायापतिमध्ये यत्संबंधं यत्तत्तेनैवानुष्ठेयं॥ नोभाभ्यामि-
ति॥ ५७॥ आहिताग्नेर्मंत्रवद्दाहदिनमारभ्य पुत्रादिभिराशौचं कार्यं॥
आहिताग्नेः प्रोषितमृते मंत्रवद्दाहात्पूर्वं पुत्रादीनामाशौचं। संध्यादि

कर्मलोपश्च नास्ति॥५८॥ अनाहिताग्नेस्तु मरणदिनमारभ्य पुत्रादिभिरा
शौचं कार्यं॥५९॥ अथ रात्रौ जननमरणे वा रात्रिं त्रिभागां कृत्वा आद्यभाग म
द्वये चेत्पूर्वदिनं तृतीयभागे चेदुत्तरदिनमारभ्याशौचं कार्यं॥ अर्धरात्रा
त्प्राक् पूर्वदिनं परत उत्तरदिनं॥ प्राक्सूर्योदयात्पूर्वदिनमूर्ध्वमुत्तरदिनमिति।
पक्षत्रयं देशाचारतो व्यवस्थितं॥ महाराष्ट्रदेशे तु आद्यपक्ष एव प्रचरति॥६१॥ ॥
अथाशौचसंपातनिर्णयः॥ तत्र दशाहमृतके दशाहं ततो न्यूनं वा मृतकमुपस्थितं
तदा पूर्वशेषेण शुद्धिः॥ दशाहसूतके दशाहं ततो न्यूनं वा सूतकं पतति तदा पूर्वशे ८
षेण शुद्धिः॥६२॥ सूतकमध्ये दशाहं न्यूनं वा मृतकं पतति तदा तस्य पूर्वेण शुद्धिर्नास्ति॥

तत्र सूतकस्यावशिष्टत्वे तु मृतकसमाप्त्या सूतकमपि समापनीयं॥६३॥ त्र्यहादिरूपमृ
तके सूतके च दशाहमृतकपाते दशाहसूतके त्र्यहादिमृतकपाते च पूर्वेण शुद्धिर्नास्ति॥
६४॥ मृतकसूतकस्य समस्य न्यूनस्य वा संपाते पूर्वेण शुद्धिः॥ अधिकस्यापि सूतकस्य
शुद्धिरिति शुद्धिविवेककारः॥६५॥ पूर्वाशौचमध्ये उत्पन्नमपि पूर्वाशौचोत्तरं ज्ञातं चेदु
त्तरमपि कार्यं॥६६॥ दशाहांत्यरात्रौ यदि दशाहमाशौचं पतति तदा दिनद्वयमधिकं कार्यं॥
६७॥ दशाहांत्यरात्रि चतुर्थयामे यदि दशाहमाशौचं न वेत्तदा दिनत्रयमधिकं कार्यं॥
६८॥ त्र्यहाद्याशौचानां परस्परं त्रिशेषे त्रिरात्रपाते पूर्वेणैव शुद्धिः॥ न त्र्यहादिवृद्धिः॥
६९॥ वर्द्धितद्वित्रिदिनमध्ये आशौचांतरसंपाते चाधिकस्य पूर्वेण शुद्धिर्नास्ति॥ समन्यू

समन्यूनयोस्तु पूर्वेण शुद्धिर्न भवति॥ सपिंडाशौचे मातृपितृनत्राशौचं पतति नदा मातृपितृम
तृदिनमरणदिनादारभ्य दशाहं सूतकं भवेत्॥७०॥ सपिंडाशौचेन मातृपितृमतृणामाशौ
नापैति॥७१॥ मात्राशौचमध्ये पित्राशौचपातेन पूर्वशेषेणैव शुद्धिः॥ पितुः संपूर्णा
शौचेन शुद्धिरित्यन्ये तेषांशेषपदे संपूर्णलक्षणापत्तिः॥७२॥ माधवीयपराशरस्मृतिव्या
ख्यायांतु शंखः॥ मातर्यग्रे प्रमीतायामशुद्धौ म्रियते पिता॥ पितुः शेषेण शुद्धिः स्यान्मा
तुः कुर्यात्तु पक्षिणीति॥ मातरि पूर्वं मृतायां यदि तन्निमित्ताशौचमध्ये पिता म्रियते चेत्त
दा न पूर्वाशौचशेषेण शुद्धिः॥ किंतु पित्राशौचकालेनैव शुद्धिः॥ तथा पूर्वं पितरि मृते तन्नि
मित्ताशौचमध्ये मातरि प्रमीतायां न पितृपित्राशौचकालशेषेण शुद्धिः॥ किंतु पित्राशौचं ९
समाप्य पक्षिणीं कुर्यादित्यर्थः॥ पित्राशौचमध्ये मातृमरणे तु पित्राशौचं समाप्य पक्षिणीं

मधिकां कुर्यात्॥ इदं दशमरात्रेरर्वाक् भवति॥ दशमरात्र्यां तद्धत्तौ त्रिचतुर्थयामे च मातृम
रणे तु घद्व्यहादेव न पक्षिणी॥७३॥ मातुः नत्रासिद्धान्वारोहणे तु नाधिका पक्षिणी॥७४॥
पूर्वाशौचेन शुद्धिश्च॥ सूतिकायामग्निदे प्रेतपुत्रे ऽच पूर्वशेषेण शुद्धिर्नास्ति॥ पूर्वाशौचे
नया शुद्धिः सूतके मृतके ऽपि च॥ सूतिकामग्निदं हित्वा प्रेतस्य च सुतानपि॥ इति षड्विंशन्मते॥
अत्र प्रेतपुत्रेति पुनर्ग्रहणं वचनांतरानुरोधेन॥७५॥ सूतके मृतकपाते पिंडदानप्रतिबंधो
नास्ति॥ मृतके सूतकसंपाते जातकर्मादि तदानीमाशौचांते वा कुर्यादिति विकल्पः॥७६॥ मा
तुर्यधिका पक्षिणी तन्मध्ये पितुरेकादशाहं श्राद्धं कुर्यात्॥ आद्यश्राद्धमशुद्धो वा कुर्याद्दिका
दशेऽहनि॥ कर्तुस्तात्कालिकी शुद्धिरशुद्धः पुनरेव सः इति वचनात्॥७७॥ शवस्पर्शे शववाहके

तु दिवा चेन्नक्षत्रदर्शनाच्छुद्धिः॥ रात्रौ चेत्सूर्यदर्शनाच्छुद्धिः॥ नदन्नाशने तत्गृहवासे यावत्त्रे
आमाशौचं तावदाशौचं॥ संसर्गाशौचे कर्मानधिकारो नास्ति॥ किंत्वस्पृश्यत्वमात्रं तत्गृहा
णां इत्यादीनां नाशौचसंबंधः॥ ७८॥ स्नेहेन सवर्णनिर्हारे तदन्नाशने तत्गृहवासे च दशाहः॥
नदन्नाशने तत्गृहवासे त्र्यहः॥ गृहवासे अन्नाशने कृते निर्हरणमात्रे कृते चैकाहः॥ ७९॥
न्तु तिष्ठहेण सवर्णनिर्हारे दाहे च कृते त्याशौचं दशाहादि॥ ८०॥ विजातीयनिर्हारे दाहे च
शावजातीयमाशौचं न वेति॥ मृतिग्रहे ण विजातीयनिर्हारे दाहे च शावजातीयादि गुणं॥
८१॥ सोदकनिर्हारे दशाहः॥ असपिंडार्थं करणे अज्ञानादुपवासः॥ २ अशक्तौ स्नानं॥ ज्ञा ११
नतापादकृच्छ्रं॥ ८२॥ धर्मार्थिमनाथसवर्णनिर्हारे क्रियाकरणे मिदाने च द्विजस्यानंतय

ज्ञफलं स्नानाच्छुद्धिः॥ प्राणायामोग्निस्पर्शश्च॥ ८३॥ धर्मार्थिमनाथसवर्णनिर्हरणादावपि मातु
लत्वादि संबंधे सति त्रिरात्रमाशौचं॥ ८४॥ अनुगमने तु सपिंडे न दोषः॥ असपिंडे पित्र
नाथक्रियायां न दोषः॥ ८५॥ समो ब्राह्मणं वर्ण्यशवानुगमने स्नात्वा कृताशौचस्पृष्ट्वा सर्पिः प्रा
श्य पुनः स्नात्वा प्राणायामं कुर्यात्॥ ८६॥ हीनवर्णशवानुगमने क्षत्रियेएकाहमाशौचं वै
श्ये पक्षिणी शूद्रे त्रिरात्रं पूर्ववत्स्नानादिकं च॥ ८७॥ ब्रह्मचारिणः सपिंडमरणे नाशौचं॥ अ
न्यस्य निर्हारे दाहादौ चौर्ध्वदेहिके धिकारो नास्ति॥ तत्करणे पुनरुपनयनं॥ कृच्छ्रप्रायश्चित्तं॥
८८॥ ब्रह्मचारिणः पितृमातृआचार्योपाध्यायमातामहानामंत्यकर्मकरणे दोषो नास्ति॥
अत्र दशाहमस्पृश्यत्वलक्षणाशौचे प्रथमदिनादि दशदिनं संध्याग्निकार्यादिकर्माधिकारो

स्यैव॥ एकदिनमस्पृश्यत्वमितिमाधवः॥ पित्राद्याशौचेपि अशौचीनामन्नं ब्रह्मचारी न च
भक्षयेत्॥ पुनरुपनयनं॥८७॥ ब्रह्मचारिणः पित्राद्यंतकर्मकरणे पित्रादिमरणे आशौचं
नास्ति॥ समावर्त्तनोत्तरं पूर्वमृतानां त्रिदिनमाशौचं कार्यमेव॥८८॥ जीवच्छ्राद्धेन कि
मप्याशौचं न कार्यमिति हेमाद्रिः॥८९॥ वानप्रस्थयतिपतितैरपि किमप्याशौचं न कार्यं॥
तेषामपि इतरैर्न कार्यं॥९०॥ परेषां सवर्णानामौर्ध्वदैहिककरणे तज्जात्याशौचं स्ना
त्वा स्वच्छत्रयात् शुद्धिः॥ हीनवर्णौर्ध्वदैहिककरणे तु शावजातीयमाशौचं स्नात्वा स्वच्छत्रया
द्वैगुण्ये त्रैगुण्ये चातुर्गुण्ये प्रायश्चित्तमनुष्ठेयं॥९१॥ आहिताग्नेरस्थिदाहे प्रतिकृतिदाहे
वा सवर्णसपिंडानां दशाहाद्याशौचं॥ अनाहिताग्नेरस्थिदाहे च पत्नीपर्णशरदाहे च पुत्रयोः ११

पूर्वमगृहीताशौचयोर्दशाहादिपूर्णमेव॥ गृहीताशौचयोस्तु तयोरपि संस्कारकाले त्रि
पत्नीसंस्कारे पक्षश्चैवं॥ सपत्न्योर्मिथश्चैवं॥ अन्यसपिंडानां पूर्वमगृहीताशौचानां अ गृह
नाहिताग्निसंस्कारकाले त्रिरात्रं॥ पूर्वगृहीताशौचानां तु सपिंडानां संस्कारकाले स्नानमा
त्रं॥ इदं त्रिरात्रादिकं दशाहोर्ध्वं संस्कारकरणे ज्ञेयं॥ दशाहमध्ये तु शेषदिवसैरेवाशौच
सिद्धिरुक्तत्वात्॥९५॥ रजस्वलायास्तु विंशतिदिनोत्तरं प्रायशो रजोदोषदर्शनं भवति त
स्याः सप्तदशादिनपर्यंतं पुनः रजोदृष्टौ स्नानमात्रं॥ अष्टादशे एकरात्रं॥ नवदशे द्विदिनं॥
विंशतिप्रभृतिदिनत्रयं॥ यस्यास्तु विंशतिदिनादर्वाक् प्रायशो रजोदर्शनं भवति तस्याः
दशादिनपर्यंतं स्नानमात्रं॥ एकादशे एकरात्रं॥ द्वादशे द्विरात्रं॥ त्रयोदशाद्यन्यत्रिरात्रं॥९६॥

दशमेऽह्न्यपुत्रा चेन्न वेद्यादिरुजस्वला। पत्युः मृतस्य वै कर्म कथं स्यादिति संशयः॥ स्नात्वा
नारी चतुर्थेऽह्नि शुद्धा भवति पंचमे। दशाहांतं विना कर्म पुनः कुर्याद्यथाविधिः॥ ॥अत्र मू
लवचनानि मिताक्षरामाधवादिनिबंधेभ्यो ज्ञेयानि॥ विस्तरभयाद्बालानां दुरधिगमत्वा
च्च न लिखितानि॥ ॥इति नारायणात्मजरघुनाथपंडितविरचिताशौचनिर्णयः समाप्तः॥
अथ द्रव्यशुद्धिः॥ क्षीरमन्यद्दधि तक्रांबु तिलपुष्पगुडं फलं। शाककाष्ठौषधीमूलं ग्राह्यं
स्याच्छ्वान्यनुज्ञया॥१॥ एतानि अपक्वानि ग्राह्याणि॥ ताम्रं मास्लेन शुध्यति। कांस्यं रजसा
शुध्यति। चर्म तैलेन शुध्यति॥ फलादिकानां प्रोक्षणाच्छुद्धिः॥ अज्ञातीनामसपिंडानां माता
महमातुलाचार्यादीनां आशौचकालोक्तपक्षिण्यादित्रिरात्रेष्यतिक्रमे स्नानं। दशाहमध्ये १३

श्रूयते चेत्तदा दशाहमाशौचं कार्यं॥ दशाहादूर्ध्वं स्नानमात्रेण शुद्धिरिति षडशीतिः॥ ॥इति त्र्यंबकीये
षण्णवतितमोंशः॥ ॥असपिंडे योनिसंबंधिमरणे पक्षिण्याशौचं॥ तदाह गोतमः॥ पक्षिणि
मसपिंडे योनिसंबंधे सहाध्यायिनि चेति॥ अयमर्थः॥ असपिंडः स्ववेश्मनि मृतयोनिःसंबंधा
मातृष्वस्रेय पितृष्वस्रेयादयः सहाध्यायी वा तत्र गुर्वंगनादयो गृह्यंते॥ ॥संवत् १८७० वर्षे
मार्गशीर्षशुक्ल ९ गुरौ द्विवेदी लक्ष्मीदेवात्मजशिवदेवेन लिखितं स्वार्थं परार्थं च॥ ॥श्री॥

१३